# योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः १०९



नवाधिकशततमः सर्गः १०९

श्रीवसिष्ठ उवाच ।

अथ तां दयितां दृष्ट्वा विस्मयोत्फुल्ललोचनः ।

शिखिध्वज उवाचेदमाश्चर्याकुलया गिरा ।। १

का त्वमुत्पलपत्राक्षि कुतः प्राप्तासि सुन्दरि ।

किमिहासि कियत्कालं किमर्थमिह तिष्ठसि ।। २

अङ्गेन व्यवहारेण स्मितेनानुनयेन च ।

मम जायाविलासेन तत्कलेवोपलक्ष्यसे ।। ३

चूडालोवाच ।

एवमेव प्रभो विद्धि चूडालास्मि न संशयः ।

अकृत्रिमेण देहेन लब्धोऽस्यद्य मया स्वयम् ।। ४

कुम्भादिदेहनिर्माणैस्त्वां बोधयितुमेव मे ।

प्रपञ्चः शतशाखत्वमिह यातो वनान्तरे ।। ५

यदा राज्यं परित्यज्य मोहेन तपसे वनम् ।

त्वमागास्तत्प्रभृत्येव त्वद्बोधायाहमुद्यता ।। ६

अनेन कुम्भदेहेन मयैव त्वं विबोधितः ।

कुम्भादिदेहनिर्माणं त्वां बोधयितुमेव मे ।। ७

मायया न तु कुम्भादि किंचित्सत्यं महीपते ।

अथो विदितवेद्यस्त्वं ध्यानेनैतदखण्डितम् ।। ८

सर्वं पश्यसि तत्त्वज्ञ ध्यानेनाश्ववलोकय ।

अथ चूडालयेत्युक्तो बद्ध्वा परिकरं नृपः ।। ९

आत्मोदन्तं विशेषेण ध्यानेनामलमैक्षत ।

अभिराज्यपरित्यागाच्चूडालादर्शनावधि ।। १०
सर्वं मुहूर्तध्यानेन चात्मोदन्तं ददर्श सः ।
आराज्यसंपरित्यागाद्वर्तमानक्षणक्रमम् ।। ११
सर्वमालोक्य भूपालो विरराम समाधितः ।
समाधिविरतो हर्षविकासिनयनाम्बुजः ।। १२
विसार्य तरसा बाहू पुलकोज्ज्वलतां गतौ ।
गलदङ्गं घनस्नेहं मुञ्चद्बाष्पं स्फुरत्स्पृहम् ।। १३
आलिलिङ्ग चिरं कान्तां नकुलो नकुलीमिव ।
तयोरालिङ्गने तस्मिंस्तत्र भावो बभूव यः ।। १४
न स वासुकिजिह्वाभिर्वक्तुं हर्षेण शक्यते ।
दिविस्थाविव पङ्केन कृताविव मिलत्तनू ।। १५
शैलाविव समुत्कीर्णौ श्लिष्टावास्तां चिरं प्रियौ ।
मुहूर्तेन गलद्धर्मजलौ पुलकपीवरौ ।। १६
बाहू विश्लथतामीषन्निन्यतुस्तौ शनैः प्रियौ ।
अमृतापूर्णहृदयौ संशून्यहृदयोपमौ ।। १७
उन्मुक्तभुजमास्तां तावलक्षस्थितलोचनम् ।
घनानन्दक्षणं स्थित्वा तूष्णीं प्रणयपेशलम् ।। १८
कान्तां चिबुकसंलग्नकरः प्रोवाच भूपतिः ।
अत्यन्तमधुरस्निग्धः कान्तः स्वकुलयोषिताम् ।। १९
पुण्यश्च रतिनिष्पन्दः स्वादुर्नामामृतादपि ।
कियत्प्रमाणस्तन्वंग्या त्वया बालेन्दुमुग्धया ।। २०
अनुभूतश्चिरं क्लेशो भर्तुरर्थेन दारुणः ।
एवं दुरुत्तरात्तस्मात्संसारकुहरादहम् ।। २१
उत्तारितो यया बुद्ध्या सा हि केनोपमीयते ।
अरुन्धती शची गौरी गायत्री श्रीः सरस्वती ।। २२
समस्ताः पेलवायन्ते तव तन्व्या गुणश्रिया ।

धीः श्रीः कान्तिः क्षमा मैत्री करुणाद्यास्तु सुन्दरि ।। २३

कान्तास्वाकारकान्तासु प्रथमेवाभिलक्ष्यसे ।

परेणाध्यवसायेन त्वयाहमवबोधितः ।। २४

केन प्रत्युपकारेण परितुष्यति ते मनः ।

मोहादनादिगहनादनन्तगहनादपि ।। २५

पतितं व्यवसायिन्यस्तारयन्ति कुलस्त्रियः ।

शास्त्रार्थगुरुमन्त्रादि तथा नोत्तारणक्षमम् ।। २६

यथैताः स्नेहशालिन्यो भर्तृणां कुलयोषितः ।

सखा भ्राता सुहृद्भृत्यो गुरुर्मित्रं धने सुखम् ।। २७

शास्त्रमायतनं दासः सर्वम भर्तुः कुलाङ्गनाः ।

सर्वदा सर्वयत्नेन पूजनीयाः कुलाङ्गनाः ।। २८

लोकद्वयसुखं सम्यक्सर्वं यासु प्रतिष्ठितम् ।

निरिच्छायाः प्रयातायाः पारं संसारवारिधेः ।। २९

कथमस्योपकारस्य करिष्ये ते प्रतिक्रियाः ।

मन्ये कुलाङ्गनां लोके लोके सर्वास्त्वयाधुना ।। ३०

नारीसौजन्यचर्चासु व्यपदेश्या भविष्यसि ।

त्वां निर्मितवतो धातुर्गुणजालातिशायिनीम् ।। ३१

मन्ये प्रकुपिता नूनमरुन्धत्यादिकाः स्त्रियः ।

सती त्वं रूपसौजन्यगुणरत्नसमुद्गिके ।। ३२

एहि मे त्वद्गुणोत्कस्य पुनरालिङ्गनं कुरु ।

श्रीवसिष्ठ उवाच ।

इत्युक्त्वा मृगशावाक्षीं चूडालां तां शिखिध्वजः।। ३३

आलिलिङ्ग पुनर्गाढं नकुलो नकुलीमिव ।

चूडालोवाच ।

देव शुष्कक्रियाजालपरे त्वय्याकुलात्मनि ।। ३४

भूयोभूयो भृशमहं त्वदर्थं दुःखिताभवम् ।

तेन त्वदवबोधात्मा स्वार्थं एवोपपादितः ।। ३५

मया तदत्र किं देव करोषि मम गौरवम् ।

शिखिध्वज उवाच ।

त्वया यथा वरारोहे स्वार्थः संपाद्यते शुभः ।। ३६

तमिदानीं तथा सर्वाः साधयन्तु कुलाङ्गनाः ।

चूडालोवाच ।

बुध्यसे कान्त विश्रान्तो जगज्जालतटे विभो ।। ३७

अद्य तं प्राक्तनं किंचिन्मोहं समनुपश्यसि ।

इदं करोमि नेदं तु प्राप्नोमीदमिति स्थितिम् ।। ३८

अन्तर्हससि तां कच्चिद्दशापेलवतां धियः ।

तास्तुच्छतृष्णाकलनास्ताः संकल्पकुकल्पनाः ।। ३९

त्वयि नाद्यावलोक्यन्ते देव व्योम्नीव पर्वताः ।

किं त्वमद्याङ्ग संपन्नः किंनिष्ठोऽसि किमीहसे ।। ४०

कथं पश्यसि पाश्चात्यं देहचेष्टाक्रमं विभो ।

शिखिध्वज उवाच ।

सुमनःपूर्णनीलाब्जमालासारविलोचने ।। ४१

त्वमेव यस्य यस्यान्तस्तत्तस्याहमुपास्थितः ।

निरीहोऽस्मि निरंशोऽस्मि नभःस्वच्छोऽस्मि निस्पृहः।। ४२

शान्तोऽहमर्थरूपोऽस्मि चिरायाहमहं स्थितः ।

तां दशामुपयातोऽस्मि यतश्चित्तैकवर्त्मनि ।। ४३

प्रतिषेधन्ति सहसा न यां हरिहरादयः ।

नकिंचिन्मात्रचिन्मात्रनिष्ठोऽस्मि स्वस्थ आस्थितः।। ४४

भ्रमेणाहं विमुक्तोऽस्मि संसारेणालिलोचने ।

न तुष्टोस्मि न खिन्नोऽस्मि नायमस्मि न चेतरत् ।। ४५

न स्थूलोऽस्मि न सूक्ष्मोऽस्मि सत्यमस्मि च सुन्दरि ।

तेजोबिम्बात्प्रयातेन भित्तावपतितेन च ।। ४६

क्षयातिशयमुक्तेन प्रकाशेनास्मि वै समः ।

शान्तोस्मि साम्यं नेतास्मि स्वस्थोस्मि विगताशयः।। ४७

परिनिर्वाण एवास्मि सदृशोऽस्मि पतिव्रते ।

यत्तदस्मि तदेवास्मि वक्तुं शक्नोमि नेतरत् ।। ४८

तरङ्गतरलापाङ्गे गुरुस्त्वं मे नमोऽस्तु ते ।

प्रसादेन विशालाक्ष्यास्तीर्णोऽस्मि भवसागरात् ।। ४९

पुनर्मलं न गृह्णामि शतध्मातसुवर्णवत् ।

शान्तः स्वस्थो मृदुर्यत्तो वीतरागो निरंशधीः ।। ५०

सर्वातीतः सर्वगश्च खमिवायमहं स्थितः ।

चूडालोवाच ।

एवं स्थिते महासत्त्व प्राणेश हृदयप्रिय ।। ५१

किमिदानीं प्रभो ब्रूहि रोचते ते महामते ।

शिखिध्वज उवाच ।

प्रतिषेधं न जानामि न जानाम्यभिवाञ्छितम् ।। ५२

यदाचरसि तन्वि त्वं कदाचिद्वेद्मि तत्तथा ।

यद्यन्मतं ते सकलं तथास्त्वविकलं प्रिये ।। ५३

न किंचिदनुसंधातुं जानाम्यम्बरसुन्दरः ।

यदेव किंचिज्जानासि तदेव कुरु सुन्दरि ।। ५४

तदेव धारयिष्यामि प्रतिबिम्बं यथा मणिः ।

चेतसा गलितेष्टेन यथाप्राप्तमनिन्दितम् ।। ५५

न स्तौमि न च निन्दामि यदिच्छसि तदाचर ।

चूडालोवाच ।

यद्येवं तन्महाबाहो समाकर्णय मन्मतम् ।। ५६

आकर्ण्य जीवन्मुक्तात्मस्तदेवाहर्तुमर्हसि ।

सर्वत्रैक्यावबोधेन मौर्ख्यक्षयभुवान्विताः ।। ५७

निरिच्छास्तावदाकाशविशदाः संस्थिता वयम् ।

यादृगेषणमस्माकं तादृशं तदनेषणम् ।। ५८

यत्प्राणानैषणे कोऽत्र चिन्मात्रोऽभ्यसते हि कः ।

तस्मादाद्यन्तमध्येषु ये वयं पुरुषोत्तम ।। ५९

शेषमेकं परित्यज्य त एवेमे स्थिता वयम् ।

राज्येन सांप्रतेनेमं कालं नीत्वा क्रमेण वै ।। ६०

विदेहतां प्रयास्यामः प्रभो कालेन केनचित् ।

शिखिध्वज उवाच ।

वयमाद्यन्तमध्येषु कीदृशास्तरले वद ।। ६१

शेषमेकं परित्यज्य तिष्ठामः कथमेव वा ।

चूडालोवाच ।

वयमाद्यन्तमध्येषु राजानो राजसत्तम ।। ६२

मोहमेकं परित्यज्य भवामः पुनरेव ते ।

स्व एव नगरे राजा भव त्वं स्वासने स्थितः ।। ६३

ललामो ननु कान्तानां महिषी ते भवाम्यहम् ।

सनृपा मत्तवास्तव्या नृत्यन्नवनवाङ्गना ।। ६४

सपताका ध्वनत्तूर्या पुष्पप्रकरिणी पुरी ।

लसद्वल्ल्या समञ्जर्या रणत्पुष्पालिमालया ।

मधुमासलतालक्ष्म्या चिराद्भवतु सा समा ।। ६५

श्रीवसिष्ठ उवाच ।

इति चूडालया प्रोक्तो विहस्य स शिखिध्वजः ।

प्रोवाच मधुरं वाक्यमक्षुब्धं विगतज्वरः ।। ६६

एवं चेत्तद्विशालाक्षि स्वायत्ता नस्त्रिविष्टपे ।

सिद्धभोगश्रियस्तासु निवसामि न किं प्रिये ।। ६७

चूडालोवाच ।

न राजन्मम भोगेषु वाञ्छा नापि विभूतिषु ।

स्वभावस्य वशादेव यथाप्राप्तेन मे स्थितिः ।। ६८

न सुखाय मम स्वर्गो न राज्यं नापि च क्रिया ।

यथास्थितमविक्षुब्धं तिष्ठामि स्वस्थचेष्टिता ।। ६९

इदं सुखमिदं नेति मिथुने क्षयमागते ।

सममेव पदे शान्ते तिष्ठामीह यथासुखम् ।। ७०

शिखिध्वज उवाच ।

युक्तमुक्तं विशालाक्षि त्वयैतत्समया धिया ।

को वार्थः किल राज्यस्य ग्रहे त्यागेऽपि वा भवेत् ।। ७१

सुखदुःखदशाचिन्तां त्यक्त्वा विगतमत्सरम् ।

यथासंस्थानमेवेमौ तिष्ठावः स्वस्थतां गतौ ।। ७२

इति तत्र कथालापकथनेन तयोर्द्वयोः ।

कान्तयोश्चिरदंपत्योर्वासरस्तनुतां ययौ ।। ७३

अथोत्थाय दिनाचारं यथाप्राप्तमनिन्दितौ ।

सोत्कण्ठावप्यनुत्कण्ठौ चक्रतुः कार्यकोविदौ ।। ७४

स्वर्गसिद्धिमनादृत्य तस्थतुः पूर्णचेतसौ ।

एकस्मिन्नेव शयने तैस्तैः प्रणयचेष्टितैः ।

सा व्यतीयाय रजनी तयोर्जीवद्विमुक्तयोः ।। ७५

तद्भोगमोक्षसुखमुत्तमयोः स्वय स-

माशंसतोः प्रणयवाक्यविलासगर्भम् ।

उत्कण्ठतां प्रणयिनोर्धियमानयन्ती

दीर्घा मुहूर्तवदसौ रजनी जगाम ।। ७६

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे पू० चू० चूडालाप्रकटीकरणं नाम नवोत्तरशततमः सर्गः ।। १०९ ।।